M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref.
Ser. 688

Title: Dandakaranta
Vada

688

दंडकारणांत वाद:

	: Daṇḍakāraṇta Vāda		Title
	:	:	: Author
	:	:	: Editor
	:	:	: Year. Vols.
	:	:	: Publisher
688	:	:	: Remarks

श्रीगणेशाय नमः ॥ ननु दंडस्य घटत्वावच्छिन्नं प्रति केन रूपेण हेतुता । न तावद्दंडत्वेन तत्स्यैकस्याभावात् । न च दंडत्वं जातिर्घटजनकतावच्छेदकतया इति वाच्यं । पृथि-
वीत्वादिना सांकर्यप्रसंगात् । पृथ्वीत्वं विहाय दंडत्वं स्वर्णदंडे दंडत्वं विहाय पृथ्वीत्वं घटे पार्थिवदंडे च तयोः सांकर्यात् । न च दंडत्वं हि जातिविशेषः परं यस्या
दंडत्वहानिरिति वाच्यं । रूपादिहानिरिति यादि निगमनाविरहात् । अत्र केचिदाहुः । रूपादिहानिः नीलत्वादिना जातिसंकरप्रसंगात् । न च स्नेहहानि । मधुरत्वा-
दिना जातिसंकरप्रसंगात् । न च गंधहानि सुरभित्वादिना जातिसंकरप्रसंगात् । न च स्पर्शहानिः सुकुमारत्वादिना जातिसंकरप्रसंगात् । न च परिमाणहानि
प्रकृष्टत्वादिना सांकर्यात् । न च संयोगहानि अभिघातत्वादिना सांकर्येण प्रसंगात् । न च अभिघातत्वं निरुद्धमेवास्ति । तथापि दंडत्वस्यैव दंडहेतुत्वेन सं- जाति ५
योगादिकस्यानापेक्षत्वात् लाघवात् । तदेव दंडहानिरेवमेवास्तु । न च पृथक्त्वहानि सदपि तन्न अवधिज्ञानापेक्षणात् । नाह [?] प्रत्यक्षं प्रति अव[struck]धि-
ज्ञानस्य स्वातंत्र्येण हेतुत्वकल्पने गौरवात् । न च तत्कार्यतावच्छेदकं पृथक्त्वं प्रत्यक्षत्वं प्रमेय । वादिना पृथक्त्वस्याभावव्यभिचार इति । न च पृथक्त्वस्य एक-
पृथक्त्वादि पृथक्त्वादिना इत्यादि प्रकारोऽसंभवात् । तावद्गंधत्वं कारणतावच्छेदकत्वे अनेकानां त्वंतदपेक्षया पृथक्त्वभिन्नानामवच्छेदकत्वात् प्रत्यक्षं प्रति अवधिज्ञान-
स्य हेतुत्वमस्तु लाघवात् न तदा दंडत्वस्यापि पृथक्त्वभिन्नत्वाहानि[?] । तत्र हि अवधिज्ञानस्य स्वातंत्र्येण हेतुत्वमिति । विषयमुदितस्यात्र मणिका-
रणमतेऽनभ्युपगमात् । अवधिज्ञानापेक्षणात् दंडत्वावच्छेदककारणतावच्छेदकत्वं अवधिज्ञानापेक्षणात् । नाह शाजातिकदकत्वहानिरेवास्तु ।
न व्याप्तेः । एकत्वहानिः दंडहानिः जातिस्वीकारे केवलदंडादपि घटोत्पत्तिः स्यात् । न च एकत्वहानिः भ्रमरजनकहानित्वादेव न घटोत्पत्तिरिति वाच्यं ॥ न

स्याप्यापाद्यत्वात्। तस्मादेतद्दूषणत्वावच्छिन्नंप्रतिनदंडत्वेनहेतुनेति विशिष्येवकार्यकारणभावः प्रत्यासत्तिस्तु नसंयोगः। तद्दंडानधिकरणदेशो
पितत्वात्। किंचदैशिकसन्निकर्षसंबंधेनघटं प्रतिव्यवहितपूर्ववृत्तित्वसंबंधेनदंडइतिदैशिकीकालिकीवा॥ यत्रतादात्म्यसंबंधेनदंडइत्यनाहृत्यासीका
रेसामान्यमानाभावइतिवदंति। प्राचस्तु॥ भ्रमकारणत्वेनैवदंडस्यहेतुत्वमिति। तन्न। अन्यथासिद्धिनिरूपकवृत्तित्वेनतस्यान्यथासिद्धत्वात्। घटा
र्थिनोदंडप्रवृत्तिः प्रथमंभ्रमरूपधानानिर्णयात्। विनिगमकाभावात्। दंडस्यापिघटजनकत्वेनभ्रमिभ्रमिहेतुः अन्यो। न्यायाश्रयात्वच॥
केचित्तु॥ एकत्वव्यक्तित्वजातिस्वीकारपरंपरयाजातिसंबंधेनहेतुत्वकल्पनेगौरवात्। दंडवृत्तिरेवजातिर्नतुसंकरः॥ स्वर्णादेः पार्थिवभौम
स्याप्युपष्टंभकत्वात्। तद्वृत्तिरेवजातिरित्याहुः। दंडत्वंतद्वृत्तिधीविशेष्यत्वमितिकेचित्। तद्दंडवृत्तिस्वीकारादवच्छिन्नस्वीकारादवजातिस्तत्त्वेनतत्त
स्यहेतुतेति। यथामण्यादावपि मणिवृत्तिशक्तेरवच्छेदकत्वेकारणतामनिर्वाहकयपितथा[illegible]नावच्छेदकत्वं दंडघटव्याप्यजातिविशेषः। तेनव्यभिचारइतिकं ग्रं॰
चित्। केचित्तु। दंडत्वंदंडमात्रवृत्त्यखंडभेदः सएव अवच्छेदकइत्याहुः। दिक्प्रतितु ज्ञायतएवेतितनतत्रतादृशसामग्रीप्रतिबंधनाकल्पनंप्राभाकराणांमते
तु तादृशज्ञानादनुमित्यादावितिधायाहेतुत्वंकल्प्यमित्वानापि वर्णितुर्नाइतिशक्यंतेनपाइच्छांविनापितादृशानुमित्युत्पत्तेः। एतेननैयायिकमतेपद हेरंब
ज्ञानवानहंमित्यादिशाब्दबाधयोग्यताज्ञानेकल्पनाधिक्यात्। ज्ञानद्वयेनगौरवं। स्वप्रकाशमतेतुघटादिपदार्थोपस्थितिमेवयोग्यताज्ञानात्म १
कतयैवात्मकपदार्थतादृशज्ञानादिरूपापरपदार्थवत्त्वरूपयोग्यतानियमतोऽवगाहनात्। अतः पदार्थोपस्थितेर्हेतुत्वेननिर्वाहणतत्रयोग्यता
ज्ञा॰

ज्ञानस्यहेतुत्वांतरकल्पनमहितेनतदपेक्षयैव। नैयायिकसंमतपदर्शितवहुतरलाघवेनस्वगौरवेणतादृशगौरवस्याकिंचित्करत्वादितिकृतंपल्लवितेन॥ इतिदंडका
रणतावादः समाप्तः॥ ॥